# SS-I/1/22SSS1CCTC1/23

**प्रथमसत्रार्द्धम्**

**प्रथमपत्रम्**

**दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. भारतीयदर्शनानुसारं शिक्षायाः परिभाषाद्वयं लिखत।
2. प्रकृतिवादस्य स्वरूपं सङ्क्षेपेण निरूपयत।
3. स्वामिविवेकानन्दस्य शिक्षादर्शनं सङ्क्षेपेण लिखत।
4. प्रजातन्त्रस्य स्वरूपं किम्?
5. भारतीयसंविधानानुसारं महिलाभ्यः शिक्षायाः अवसराः के?
6. आदर्शवादस्य सिद्धान्तान् लिखत।
7. विशिष्टवर्गेभ्यः के के शैक्षिकावसराः सन्ति?

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. दर्शनस्यार्थं वर्णयित्वा स्वामिदयानन्दस्य शैक्षिकचिन्तनं प्रतिपादयत।
9. राष्ट्रियैकतानिर्माणे प्रजातान्त्रिकशिक्षा कथं सहकारिणीति वर्णयत।
10. प्रयोजनवादं प्रतिपाद्य शिक्षायां तस्यानुप्रयोगं विमृशत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. शिक्षायाः सामाजिकोद्देश्यानि विलिख्य शिक्षायाः अभिकरणानि प्रकार्याणि च विशदयत।
12. शिक्षाधिकाराधिनियमस्य (2009) मुख्यांशान् उल्लिखत।

# SS-I/2/22SSS1CCTC2/23

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## अधिगमविकासयोः मनोविज्ञानम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शिक्षामनोविज्ञानस्य क्षेत्रं निरूपयत।
2. अभिवृद्धि-विकासयोः भेदान् प्रतिपादयत।
3. बालकस्य विकासे वातावरणस्य प्रभावं विशदयत।
4. शास्त्रीयानुबन्धनसिद्धान्तस्य शैक्षिकनिहितार्थं प्रतिपादयत।
5. अधिगमस्थानान्तरणस्य प्रकारान् वर्णयत।
6. बुद्धेः द्विकारकसिद्धान्तं व्याख्यात।
7. अभिप्रेरणायाः प्रकारान् लिखत।

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. अधोलिखितदत्तांशानां मध्यमानं गणयत।

| C.I. | 1-10 | 11-20 | 21-30 | 31-40 | 41-50 | 51-60 | 61-70 | 71-80 | 81-90 |
|---|---|---|---|---|---|---|---|---|---|
| f | 3 | 4 | 5 | 8 | 9 | 8 | 6 | 5 | 2 |

9. स्किनरमहोदयस्य क्रियाप्रसूतानुबन्धनसिद्धान्तं विलिख्य, तस्य शैक्षिकोपयोगितां स्पष्टयत।
10. "शिक्षकः मनोविज्ञानी भवेत्" – इत्यस्य स्पष्टीकरणं कुरुत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. व्यक्तित्वमापनस्य प्रक्षेपक-अप्रक्षेपकविधीन् वर्णयत।
12. विकासस्य अवस्थाः प्रतिपाद्य, एकस्याः अवस्थायाः विस्तृतरूपेण व्याख्यानं कुरुत।

# SS-I/3/22SSS1CCTC3/23

**प्रथमसत्रार्द्धम्**

**तृतीयपत्रम्**

**शिक्षणाधिगमयोः सूचनासम्प्रेषणप्रविधिः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शैक्षिकप्रविधेः उपयोगिताः स्पष्टयत।
2. व्यवहारप्रविधेः तात्पर्यं लिखत।
3. शिक्षणस्तरान् निर्दिशत।
4. सूचनासम्प्रेषणस्य सम्प्रत्ययं लिखत।
5. सम्प्रेषणे अपेक्षितानि मुद्रितसाधनानि विवृणुत।
6. शिक्षणविधि–प्रविधिः इत्यनयोः भेदं स्पष्टयत।
7. ई–अधिगमस्य सम्प्रत्ययं स्पष्टयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. अधिगमस्य अर्थं विलिख्य आयामान् विशदीकुरुत।
9. सूक्ष्मशिक्षणस्य परिचयं प्रदाय श्यामपट्टकौशलस्य एकां पाठयोजनां लिखत।
10. दलशिक्षणस्यार्थं विलिख्य उद्देश्यानि प्रयोजनानि च निरूपयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. शिक्षणाधिगमप्रक्रियायाम् अध्यापकस्य भूमिकां वर्णयत।
12. अभिक्रमिताधिगमस्य स्वरूपं विलिख्य प्रकारान् सविस्तरं प्रतिपादयत।

# SS-I/4/22SSS1CCTC4/23

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## भाषाशिक्षा (Language Education)

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. का नाम भाषा? भाषायाः प्रकृतिं स्पष्टयत।
2. गृहभाषा–विद्यालयीयभाषा इत्यनयोः भेदं स्पष्टयत।
3. पठनकौशलस्य भेदद्वयं स्पष्टीकुरुत।
4. प्रथमशिक्षानीतौ (1968) भाषायाः स्थानं प्रतिपादयत।
5. भाषाविज्ञानस्य अङ्गानि लिखत।
6. भाषाविज्ञानस्य अर्थः कः?
7. औपचारिकसंस्कृतशिक्षणस्य अभिकरणानि लिखत।

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. भारते सम्पर्क–राजभाषयोः अन्तरं निरूपयत।
9. विद्यालयस्तरे भाषाशिक्षणे संस्कृतभाषाशिक्षकाणां भूमिकां उत्तरदायित्वं च स्पष्टयत।
10. भाषाकौशलानां वैशिष्ट्यं प्रतिपादयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. संविधानस्य अष्टमानुसूचीं प्रान्तीयभाषाः च विशदयत।
12. भाषायाः उद्गमं विकासं च प्रतिपादयत।

# SS-I/5/22SSS1CCTC5/23

**प्रथमसत्रार्द्धम्**

**पञ्चमपत्रम्**

**शैक्षिकप्रबन्धनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. समयसारिण्याः सम्प्रत्ययं महत्त्वं च लिखत।
2. शैक्षिकप्रबन्धनस्य प्रमुखाः आवश्यकताः काः?
3. अध्यापकाभिभावकसंघस्य कार्याणि निरूपयत।
4. विद्यालयभवनस्य प्रकारत्रयं सचित्रं वर्णयत।
5. 'पुस्तकालयः विद्यालयस्य हृदयम्' इतीमां वाणीं स्पष्टयत।
6. शैक्षिकप्रशासनस्य प्रकार्याणि विशदयत।
7. शैक्षिकसङ्घटनस्य प्रमुखानि उद्देश्यानि लिखत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. समयसारिण्यां पाठ्यसहगामिक्रियाणां महत्त्वं विलिख्य शैक्षिकप्रबन्धनस्य सिद्धान्तान् विवेचयत।
9. प्रधानाध्यापकस्य विशेषतां विलिख्य तस्योत्तरदायित्वानि स्पष्टयत।
10. राष्ट्रियस्तरे शैक्षिकप्रशासनस्य संरचनां प्रतिपाद्य विद्यालये संस्कृतमयवातावरणनिर्माणे संस्कृतशिक्षकस्य स्थानं स्पष्टयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. समयसारिण्याः भेदान् प्रतिपाद्य शिक्षकसमयसारिण्याः स्वरूपं विशदयत।
12. विद्यालयोपस्करणानि (Furniture) कानि? सङ्गणकप्रयोगशालायाः स्वरूपं महत्त्वं च लिखत।